नामांकाः Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. Of Questions- 22

**S–71–Sanskrit (T.L)**

No. Of Printed Pages- 07

# माध्यमिक परीक्षा, 2016

# SECONDARY EXAMINATION, 2016

# तृतीय भाषा – संस्कृतम्

समय : $3\frac{1}{4}$ (सपाद होरात्रयम्)

अधिकतमांकाः 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया।
5 सर्वे प्रश्नाः संस्कृतभाषयैव उत्तरणीयाः।

प्र.1. अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

गंगानदी भारतस्य पवित्रतमा नदी। यमुनानदी अपि पूज्या नदी अस्ति। सरस्वतीनदी लुप्ता अभवत् इति जनानां विश्वासः। उत्तरप्रदेशस्य प्रयागनगरम् एतासां तिसृणां नदीनां संगमे तिष्ठति। कावेरी, तुंगभद्रा, गोदावरी, नर्मदा, चर्मण्वती, कृष्णा भारतस्य प्रसिद्धाः नद्यः सन्ति। नदीनां संगमेषु अस्माकं तीर्थस्थानानि सन्ति। जनाः तासु नदीषु स्नात्वा, मन्दिराणां दर्शनं च कृत्वा हर्षम् अनुभवन्ति।

(क) एकपदेन उत्तरत–

(i) का नदी लुप्ता अभवत्? (½)

(ii) कुत्र अस्माकं तीर्थस्थानानि सन्ति? (½)

(ख) पूर्णवाक्येन उत्तरत–

(i) प्रयागनगरं कुत्र तिष्ठति? (1)

(ग) निर्देशानुसारम् उत्तरत–

(i) उपर्युक्त गद्यांशे 'अपूज्या' इति पदस्य विलोमपदं लिखत। (½)

(ii) 'जनाः हर्षम् अनुभवन्ति' अस्मिन् वाक्ये कर्त्ता कः? (½)

(iii) 'गंगानदी पवित्रतमा' इत्यत्र विशेषणपदं किम्? (½)

(iv) 'भारतस्य नद्यः सन्ति'। अत्र क्रियापदं लिखत। (½)

प्र.2. अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि यथानिर्देशं लिखत्–

संस्कृतभाषायाः वैज्ञानिकतां विचार्य एव सङ्गणकविशेषज्ञाः कथयन्ति यत् संस्कृतमेव सङ्गणकस्य कृते सर्वोत्तमा भाषा विद्यते। अस्याः वाङ्मयं वेदैः, पुराणैः, नीतिशास्त्रैः चिकित्साशास्त्रादिभिश्च समृद्धमस्ति। कालिदाससदृशानां विश्वकवीनां काव्यसौन्दर्यम अनुपमम्। चाणक्यरचितम् अर्थशास्त्रं जगति प्रसिद्धमस्ति। गणितशास्त्रे शून्यस्य प्रतिपादनं सर्वप्रथमं भास्कराचार्यः सिद्धान्तशिरोमणौ अकरोत्। चिकित्साशास्त्रे चरकसुश्रुतयोः योगदानं विश्वप्रसिद्धम्। भारतसर्वकारस्य विभिन्नेषु विभागेषु संस्कृतस्य सूक्तयः ध्येयवाक्यरूपेण स्वीकृताः सन्ति। भारतसर्वकारस्य राजचिह्ने प्रयुक्तां सूक्तिं 'सत्यमेव जयते' सर्वे जानन्ति। एवमेव राष्ट्रिय शैक्षिकानुसन्धानप्रशिक्षणपरिषदः ध्येयवाक्यं 'विद्ययाऽमृतमश्नुते' वर्तते।

(क) एकपदेन उत्तरत–

(i) अर्थशास्त्रं केन रचितम्? (½)

(ii) शून्यस्य प्रतिपादनं सर्वप्रथमं भास्कराचार्यः कुत्र अकरोत? (½)

(iii) कस्य कृते संस्कृतमेव सर्वोत्तमा भाषा विद्यते? (½)

(iv) चिकित्साशास्त्रे कयोः योगदानं विश्वप्रसिद्धम्? (½)

(ख) पूर्णवाक्येन उत्तरत–

(i) भारतसर्वकारस्य राजचिह्नं किम् अस्ति? (1)

(ii) विद्ययाऽमृतमश्नुते कस्य ध्येय वाक्यम्? (1)

(iii) केषां कवीनां काव्यसौन्दर्यम् अनुपमम्? (1)

(ग) अस्य अनुच्छेदस्य उपयुक्तं शीर्षकं लिखत। (1)

(घ) यथानिर्देशं प्रश्नान् उत्तरत–

(i) ''सर्वोत्तमा भाषा विद्यते'' अत्र विशेषणपदं किम्? (½)

(ii) ''संङ्गणकविशेषज्ञाः कथयन्ति'' अत्र कर्तृपदं लिखत। (½)

(iii) 'अविचार्य' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत। (½)

(iv) ''सूक्तयः स्वीकृताः सन्ति'' इत्यत्र क्रियापदं लिखत। (½)

प्र.3. भवती रेखा। भवत्याः राजकीय–आदर्श–उच्चमाध्यमिक–विद्यालये स्वच्छतादिवसः समायोजितः आसीत्। विषयेऽस्मिन् एकं पत्रं स्वमित्रं प्रति लिखत। (8×½=4)

**अथवा**

प्र.3. भवान् सुरेशः। मातरं प्रति अद्योलिखितं पत्रं मञ्जूषापद सहायतया लिखत।

| |
|---|
| वार्षिकोत्सवः, अभिनयम्, मुख्यातिथिः, कुशलम्, अध्ययनम्, पितरम्, भवदीयः, सर्वेभ्यः |

चारूनगरात्
11 / 10 / 15

पूजनीयाः मातृचरणाः!

नमोनमः। अत्र ..............................तत्रास्तु। मम विद्यालये .................................. आसीत्। तत्र अहम् एकम् .................................. कृतवान्। मन्त्रिमहोदयः .......................... रूपेण आगतवान्। मम .................................. सम्यक् चलति। गृहे ........................ नमोनमः। अहं ........................ प्रणमामि।

..............................................

सुरेशः

प्र.4. मञ्जूषातः उचितानि पदानि चित्वा पिता–पुत्रयोः सम्भाषणं लिखत। (8×½=4)

| |
|---|
| आपणम्, शीघ्रम्, पुस्तकम्, फलानि, करोषि, शतम्, स्यूतम्, आगच्छामि। |

पिता – पुत्र! किं ................................................त्वम्?

पुत्रः – ............................................... पठामि, पितः।

पिता – पुत्र! ................................................गत्वा आगच्छसि किम्?

पुत्रः – पितः! ................................................लिखित्वा गच्छामि।

पिता – आपणतः ................................................ आनय।

पुत्रः – .......................................... रूप्यकाणि यच्छतु।

पिता – ............................................... नीत्वा आपणं गच्छ।

पुत्रः – अहं गत्वा शीघ्रम् ...............................................

प्र.5. अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया वाक्यानि रचयत। (8×½=4)



| |
|---|
| खगाः , विकसन्ति, क्रीडन्ति, बालाः, उयन्ते, कन्दुकेन, कूजन्ति, सूर्यः, कमलानि |

**अथवा**

प्र.5. अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा लिखत– (8×½=4)

| |
|---|
| आहारार्थम्, पश्यति, अनेकानि, उत्पतति, कुपितः, गच्छति, पक्वानि, एकः |

(i) ....................................... जम्बुकः अस्ति। सः एकदा।
(ii) ....................................... वने भ्रमति। एकत्र सः द्राक्षालतां।
(iii) .......................................। लतायाम्।
(iv) ....................................... द्राक्षाफलानि सन्ति। तानि
(v) .......................................। द्राक्षां खादितुम् उपरि।
(vi) ....................................... तथापि फलानि न प्राप्नोति। जम्बूकः
(vii) ....................................... भूत्वा द्राक्षाफलानि दूषयति। अनन्तरं स्वस्थानं।
(viii) .......................................।

प्र.6. पाठ्यपुस्तकात् द्वौ श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रे न स्याताम्। (2×2=4)

प्र.7. अधोलिखितेषु पदेषु सन्धिविच्छेदम् अथवा सन्धिं कृत्वा सन्धेः नामानि लिखत–

(i) प्रति + आगच्छति। (1)

(ii) मनोरथः (1)

(iii) वाक् + ईशः (1)

प्र.8. अधोलिखितवाक्येषु रेखांकितसमस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामानि लिखत–

(i) अहं पीताम्बरं धारयामि। (1)

(ii) तत्र केशवः गोपालः च कन्दुकेन क्रीडतः। (1)

(iii) मूर्खाः प्रतिकूलम् आचरन्ति। (1)

प्र.9. कोष्ठकेषु प्रदत्तैः शब्दैः प्रकृतिप्रत्ययानुसारं रिक्तस्थानानि पूरयत–

(i) लोकहितं मम ............................। कृ + अनीयर् (1)

(ii) अहं ................................ न खादामि। गम् + शतृ (1)

(iii) लोके .................................. दुर्लभम्। नर + त्व (1)

(iv) सा .................................... मधुरं गायति। बालक + टाप् (1)

प्र.10. मञ्जूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत–

| हस्तः, यथा–तथा, विना, मा |
|---|

(i) ........................... गुरुः, .........................................शिष्यः। (1)

(ii) ................................ सोमवासरः आसीत्। (1)

(iii) उच्चैः .................................. हसतु। (1)

(iv) ज्ञानं .................................... न सुखम्। (1)

प्र.11. अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखत।


(i) सा गीतां पठति। (1)

(ii) मया नाटकं दृश्यते। (1)

(iii) त्वं कुत्र तिष्ठसि। (1)

(iv) तेन भोजनं पच्यते। (1)

प्र.12. घटिकाचित्रस्य सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करणीयम्–



(i) संस्कृतसमाचारः प्रतिदिनं प्रातः .......................... आगच्छति। (1)

(ii) अहं ......................... कार्यालयं गच्छामि। (1)

(iii) वयं रात्रौ ............................ वादने शयनं कुर्मः। (1)

प्र.13. (i) 'द्वौ' इति संख्यापदस्य स्वरचितवाक्ये प्रयोगः करणीयः। (1)

(ii) 20 इति संख्यां संस्कृतभाषायां शब्दे लिखत। (1)

प्र.14. अधोलिखितं वाक्यद्वयं शुद्धं कृत्वा लिखत।

(i) पिता सह पुत्रः गच्छति। (½)

(ii) त्वं तत्र गच्छतु। (½)

प्र.15. अधोलिखितं गद्याशं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

आदेशं प्राप्य उभौ प्राचलताम्। तत्रोपेत्य काष्टपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ। आरक्षी सुपुष्टदेह आसीत्, अभियुक्तश्च अतीव कृशकायः। भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् सः भारवेदनया क्रन्दति स्म। तस्य क्रन्दनं निशम्य मुदित आरक्षी तमुवाच– "रे दुष्ट! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे" इति प्रोच्य उच्चैः अहसत्। यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ।

(क) एकपदेन उत्तरत–

(i) आरक्षी कीदृशः आसीत्? (½)

(ii) कृशकायः कः आसीत्? (½)

(ख) पूर्णवाक्येन उत्तरत– (1)

(i) पटाच्छादितं देहं स्कन्धेन वहन्तौ कं प्रति प्रस्थितौ?

(ग) "आदेशं प्राप्त उभौ प्राचलताम्" इत्यत्र कर्तृपदं लिखत। (1)

(घ) "स्कन्धेन वहनं दुष्करम् आसीत्"। इत्यत्र विशेषणपदं किम् (1)

(ङ) त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे। अस्मिन् वाक्ये क्रियापदं चित्वा लिखत। (1)

प्र.16. अधो लिखितं पद्यं पठित्वा यथानिर्देशं प्रश्नान् उत्तरत–

उदीरितोऽर्थः पशुनापि गृह्यते,
हयाश्च नागाश्च वहन्ति बोधिताः।
अनुक्तमप्यूहति पण्डितोजनः,
परेङ्गितज्ञानफला हि बुद्धयः।।

(क) एकपदेन उत्तरत–

(i) अनुक्तं कः ऊहति? (½)

(ii) उदीरितोऽर्थः केन गृह्यते? (½)

(ख) परेङ्गितज्ञानफलाः काः भवन्ति? (1)

(ग) "उदीरितः अर्थः" इत्यत्र विशेष्यपदं लिखत। (1)

(घ) "नागाः वहन्ति" इत्यत्र कर्तृपदं लिखत। (1)

(ङ) "अश्वाः" इत्यस्य पर्यायपदं पद्यांशात् चित्वा लिखत। (1)

प्र.17. अधो लिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

चाणक्यः– अयमीदृशो विरोधः यत् त्वमद्यापि राजापथ्यकारिणोऽमात्यराक्षसस्य गृहजनं स्वगृहे रक्षसि।

चन्दनदासः– आर्य! अलीकमेतत्। केनाप्यनार्येण आर्याय निवेदितम्।

चाणक्यः– भो श्रेष्ठिन्! अलमाशङ्कया। भीताः पूर्वराज पुरुषाः पौराणामिच्छतामपि गृहेषु गृहजनं निक्षिप्य देशान्तरं व्रजन्ति। ततस्तत्प्रच्छादनं दोषमुत्पादयति।

चन्दनदासः– एवं नु इदम्। तस्मिन् समये आसीदस्मद गृहे अमात्यराक्षसस्य गृहजन इति।

चाणक्यः– पूर्वम् 'अनृतम्' इदानीम् "आसीत्" इति परस्परविरूद्धे वचने।

(क) एकपदेन उत्तरत–

(i) कस्य गृहजनं स्वगृहे रक्षसि? (½)

(ii) तत् किं दोषम् उत्पादयति? (½)

(ख) पूर्ण वाक्येन उत्तरत–

(i) पूर्व राजपुरुषाः गृहजनं गृहेषु निक्षिप्य कुत्र व्रजन्ति ? (1)

(ग) 'सत्यम्' इति पदस्य विलोमपदं नाट्यांशात् चित्वा लिखत। (1)

(घ) ''गृहजनः आसीत'' इत्यत्र क्रियापदं लिखत। (1)

(ङ) ''भीताः राजपुरुषाः'' इत्यत्र विशेषणपदं लिखत। (1)

प्र.18. ''आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः'' इति सूक्तेः भावार्थं संस्कृतभाषायां लिखत। (2)

प्र.19. व्यायामो हि सदा पथ्यो बलिनां स्निग्धभोजिनाम्। स च शीते वसन्ते च तेषां पथ्यतमः स्मृतः।। उपर्युक्त–श्लोकस्य अन्वयम् आश्रित्य रिक्तस्थानानि पूरयत।

(i) बलिनां ........................................................ । (½)

(ii) सदा हि ........................................................ पथ्यो । (½)

(iii) तेषां स ............................................. च वसन्ते च । (½)

(iv) ........................................................ स्मृतः। (½)

प्र.20. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुत–

(i) <u>शरीरस्य</u> आयासजननं कर्म व्यायामः इति कथ्यते। (1)

(ii) व्याघ्रं दृष्ट्वा धूर्तः शृ<u>गाल</u>ः अवदत्। (1)

(iii) भार्या <u>गृहकार्ये</u> संलग्ना अस्ति। (1)

प्र.21. अधो लिखितानि वाक्यानि क्रम रहितानि। यथाक्रमं संयोजनं कृत्वा लिखत–

(i) एकदा प्रातः शृगालः वकम् अवदत्–श्वं त्वं मया सह भोजनं कुरू। (½)

(ii) कुटिलः शृगालः स्थाल्यां वकाय क्षीरोदनम् अयच्छत्। (½)

(iii) एकस्मिन् वने शृगालः वकः च निवसतः स्म। (½)

(iv) भोजनकाले वकस्य चञ्चुः स्थालीतः भोजनग्रहणे समर्था न अभवत्। (½)

(v) सः वकः भोजनाय अग्रिमदिने शृगालस्य निवासम् अयच्छत्। (½)

(vi) वकः केवलं क्षीरोदनम् अपश्यत् तु शृगालः सर्वम् अभक्षयत्। (½)

प्र.22. 'क' स्तम्भे पदानि दत्तानि। 'ख' स्तम्भे क्रमरहिताः तेषां समानार्थकशब्दाः दत्ताः। उचितं मेलनं कृत्वा लिखत–

| | (क) | (ख) | |
|---|---|---|---|
| (i) | काकाः | अधुना | (½) |
| (ii) | सम्प्रति | सर्पः | (½) |
| (iii) | उरगः | गजः | (½) |
| (iv) | अहरहः | गर्दभः | (½) |
| (v) | करी | वायसाः | (½) |
| (vi) | खरः | प्रतिदिनम् | (½) |